# Dhumramahimavarnana Stotram

# ધૂમ્રમહિમાવર્ણનસ્તોત્રમ્

## Document Information

Text title : Dhumramahimavarnana Stotram

File name : dhUmramahimAvarNanastotram.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 9 | 8.9 1-34||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

Dhumramahimavarnana Stotram

# ધૂમ્રમહિમાવર્ણનસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥

સનકાદ્યા ઊચુઃ ।

કુરુક્ષેત્રં મહાદેવ ધૂમ્રવર્ણસ્ય સર્વદમ્ ।

માહાત્મ્યં ક્ષેત્રમુખ્યસ્ય વદ સન્તોષદાયકમ્ ॥ ૧॥

શ્રીશિવ ઉવાચ ।

ઐશાન્યે હિમવત્પ્રાન્તે ધૂમ્રવર્ણસ્ય ક્ષેત્રકમ્ ।

વિખ્યાતં તસ્ય માહાત્મ્યં વર્ણિતું કઃ ક્ષમો ભવેત્ ॥ ૨॥

સઙ્ક્ષેપેણ વદિષ્યામિ પ્રણમ્ય ગણનાયકમ્ ।

માહાત્મ્યં ક્ષેત્રમુખ્યસ્ય શૃણુધ્વં ત્વેકચેતસઃ ॥ ૩॥

દેવર્ષિભિઃ પ્રહર્ષેણ સ્થાપિતો ધૂમ્રવર્ણકઃ ।

શુણ્ડાદણ્ડમુખઃ શ્રીમાંશ્ચતુર્બાહુપ્રધારકઃ ॥ ૪॥

ત્રિનેત્ર એકદન્તશ્ચ પરશ્વાદિસમન્વિતઃ ।

અહઙ્કારો ગણેશાનં ભજતે તત્ર નિત્યશઃ ॥ ૫॥

વામે સિદ્ધિર્દક્ષિણાઙ્ગે બુદ્ધિઃ સર્વપ્રિયઙ્કરી ।

પુરતો મૂષકસ્તસ્ય ધૂમ્રવર્ણસ્ય શોભનઃ ॥ ૬॥

દશયોજનવિસ્તારઃ ક્ષેત્રસ્ય ગણપસ્ય ચ ।

ચતુરસ્રં ચ તત્ ક્ષેત્રં સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૭॥

પુરતો ધૂમ્રવર્ણસ્ય ભક્તા મુદ્ગલમુખ્યકાઃ ।

શુકાદ્યાસ્તં ભજન્તે તે સ્તુવન્તિ સ્મ મહર્ષયઃ ॥ ૮॥

પૃષ્ઠતઃ પાર્ષદાસ્તસ્ય પ્રમોદામોદકાદયઃ ।

આત્તશસ્ત્રા મહાભાગાઃ સેવન્તે ધૂમ્રવર્ણકમ્ ॥ ૯॥

વામાઙ્ગે તીર્થમુખ્યાનિ પ્રયાગાદીનિ માનદાઃ ।

ક્ષેત્રાણિ કાશીમુખ્યાનિ ભજન્તે ધૂમ્રવર્ણકમ્ ॥ ૧૦॥

દક્ષિણાઙ્ગેઽમરેશાનાઃ શમ્ભુવિષ્ણુમુખાઃ સદા ।

સગણાઃ સપરીવારા ભજન્તે ગણનાયકમ્ ॥ ૧૧॥

શેષાદ્યા નાગરાજાશ્ચ પર્વતા હૈમમુખ્યકાઃ ।
ગન્ધર્વાશ્ચારણાઃ સિદ્ધા વસવો મનવસ્તથા ॥ ૧૨॥
આદિત્યા રુદ્રકાદ્યાશ્ચ વિદ્યાધરાપ્સરાદયઃ ।
વસન્તિ તત્ર ક્ષેત્રે તે ભજન્તે દ્વિરદાનનમ્ ॥ ૧૩॥
યદ્યચ્છ્રેષ્ઠતમં લોકે તત્તત્તત્રૈવ સંસ્થિતમ્ ।
સેવાર્થં ધૂમ્રવર્ણસ્ય ભક્તિભાવસમન્વિતમ્ ॥ ૧૪॥
તેષાં સ્થાનાદિકં વિપ્રાઃ કથિતું નૈવ શક્યતે ।
અપારત્વાત્તતઃ સઙ્ક્ષેપતઃ પ્રોક્તં મયા પરમ્ ॥ ૧૫॥
તત્ર તીર્થં મહાસિદ્ધિદાયકં વર્તતે પરમ્ ।
ધૂમ્રવર્ણસ્ય તત્રૈવ સ્નાનં કરોતિ વિઘ્નપઃ ॥ ૧૬॥
તત્ર સ્નાનેન સદ્યશ્ચ વાઞ્છિતં લભતે નરઃ ।
અન્તે મોક્ષં ન સન્દેહો યત્ર કુત્ર મૃતોઽપિ ચેત્ ॥ ૧૭॥
તત્ર વિષ્ણુમુખા દેવાઃ કશ્યપાદ્યા મહર્ષયઃ ।
નિત્યં સ્નાનં પ્રકુર્વન્તિ પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૧૮॥
અન્યક્ષેત્રસ્થનાગાદ્યાસ્તત્ર સ્નાનં પ્રકુર્વતે ।
જનાઃ ક્ષેત્રનિવાસાર્થં સ્થિતાસ્તેઽપિ મુદાન્વિતાઃ ॥ ૧૯॥
શિવવિષ્ણુમુખાનાં ચ તત્ર તીર્થાનિ માનદાઃ ।
સ્થિતાનિ સ્નાનમાત્રેણ તેષાં પદપ્રદાનિ ચ ॥ ૨૦॥
તત્ર દર્શનમાત્રેણ ધૂમ્રવર્ણસ્ય વૈ સકૃત્ ।
ઈપ્સિતં લભતે સદ્યો માનવો પુણ્યવાન્ ભવેત્ ॥ ૨૧॥
યાત્રામાત્રેણ તત્રૈવ ધર્માર્થકામમોક્ષકમ્ ।
લભતે એકવારેણ યત્ર કુત્ર ગતોઽપિ ચેત્ ॥ ૨૨॥
ભાદ્રશુક્લચતુર્થ્યાં સ સ્થાપિતો ધૂમ્રવર્ણકઃ ।
દેવર્ષિભિશ્ચ મધ્યાહ્ને સા તિથિઃ પરમા મતા ॥ ૨૩॥
વાર્ષિકઃ સુમહોત્સાહસ્તત્રૈવ ક્રિયતે જનૈઃ ।
ભાદ્રશુક્લચતુર્થ્યાં તુ યાત્રાં કુર્વન્તિ માનવાઃ ॥ ૨૪॥
પરસ્પરં પ્રહૃષ્ટાસ્તે બોધયન્તિ ગજાનનમ્ ।
સરોમાઞ્ચા ભવન્ત્યેવ શઙ્કરાદ્યા મહર્ષયઃ ॥ ૨૫॥
ગાણેશા ભાવસંયુક્તા યાત્રાર્થં હર્ષસંયુતાઃ ।
તત્ર ગચ્છન્તિ ચાન્યે યે વૈષ્ણવાદ્યાઃ પ્રહર્ષિતાઃ ॥ ૨૬॥
કૃત્વા યાત્રાં પુનઃ સર્વે સ્વસ્વસ્થાનગતા મુદા ।
સ્મરન્તિ ધૂમ્રવર્ણં તં ભક્તિભાવસમન્વિતાઃ ॥ ૨૭॥

અન્તે સ્વાનન્દગાઃ સર્વે ભવન્તે નાત્ર સંશયઃ ।
શૈવાદ્યાઃ ક્રમમાર્ગેણ સ્વાનન્દસ્થા ભવન્તિ તુ ॥ ૨૮॥
ક્ષેત્રે મરણતો વિપ્રાઃ સ્વાનન્દો લભ્યતે જનૈઃ ।
યત્ર કુત્ર સ્થિતાશ્ચૈવ ગાણપા બ્રહ્મરૂપકાઃ ॥ ૨૯॥
ધૂમ્રવર્ણસ્ય ક્ષેત્રસ્ય માહાત્મ્યં લેશતો મયા ।
કથિતું વિસ્તરેણૈવાર્હતિ કો નૈવ વર્ણિતુમ્ ॥ ૩૦॥
ગાણેશાનિ ચ ક્ષેત્રાણિ બ્રહ્મભૂતમયાનિ તુ ।
યાવન્તિ બ્રહ્મગોલેઽસ્મિંસ્તાવન્તિ મુનિસત્તમાઃ ॥ ૩૧॥
ધર્માર્થકામમોક્ષાણાં ક્ષેત્રાણિ વિવિધાનિ ચ ।
ચતુઃપદમયાન્યેવ જ્ઞાતવ્યાનિ ન સંશયઃ ॥ ૩૨॥
પઞ્ચમં યત્ પદં પ્રોક્તં બ્રહ્માકારં મહર્ષિભિઃ ।
ક્ષેત્રં ગણપતેર્વિપ્રા યત્ર તત્ર સ્થિતં કિલ ॥ ૩૩॥
ઇદં ક્ષેત્રસ્ય માહાત્મ્યં શ‍ૃણુયાદ્યો નરોત્તમઃ ।
શ્રાવયેત્ પ્રપઠેદ્વાઽપિ સ સર્વાર્થમવાપ્નુયાત્ ॥ ૩૪॥

ઇતિ ધૂમ્રમહિમાવર્ણનસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૯ । ૮.૯ ૧-૩૪॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 9 . 8.9 1-34..

Proofread by Yash Khasbage, Preeti Bhandare

*Dhumramahimavarnana Stotram*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*